



Mukula Bhatta
Abhidhavrttimatrka

No. 63/1873-1874.

अभिधा वृत्ति मातृका.

मुकुलः




LIBRARY
NOV 24 1969
UNIVERSITY OF TORONTO

अभिधावृत्ति मातृका

No. 63
1873-74

॥ श्रीहरिः॥

Fol. 1b

शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते॥१॥
तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः।
शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता॥२॥
उपादानाल्लक्षणाच्च शुद्धा सा द्विविधोदिता।
स्वासिद्ध्यर्थतया क्षेपो यत्र वस्त्वंतरस्य तत्॥
उपादानं लक्षणं तु तद्विपर्ययतो मतं।
आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः॥४॥
प्रत्येकं विद्यमानत्वादुपचारश्चतुर्विधः।
तटस्थे लक्षणा शुद्धा स्यादारोपस्त्वदूरगे॥
निगीर्णे व्यवसानं तु रूढ्यासन्नतरत्वतः।
वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात्॥
लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः।
आ- यभिहितानां सा वाच्यत्वादूर्ध्वमिष्यते॥७॥
आन्वितानां तु वाच्यत्वे वाच्यत्वस्य पुरस्थिता।
द्वये द्वयमखण्डं तु वाक्यार्थे परमार्थतः॥८॥
नास्त्यसौ कल्पितेऽर्थे तु पूर्ववत्प्रविभषते
मुख्यार्थासंभवात्सेयं मुख्यार्थासन्ति हेतुका॥९॥
रूढेः प्रयोजनाद्वापि व्यवहारेवलोक्यते।

Fol. 2a

सादृश्ये वैपरीत्ये च वाच्यस्याति तिरस्क्रिया॥१०॥
विवक्षा चाविवक्षा च संबद्धसमवाययोः।
उपादाने विवक्षात्र लक्षणे त्वाविलक्षणम्॥११॥
तिरस्क्रिया क्रियायोगे क्वाचित्तद्विपरीतता।
विवर्तमानं वाक्तत्त्वं दशधैवं विलोक्यते॥१२॥
संहृतक्रमभेदे तु तस्मिंस्तेषां कुतो गतिः।
इत्येतदभिधावृत्तं दशधात्र निवेचितम्॥१३॥

Fol. 2b.

पदवाक्यप्रमाणेषु तदेतत्प्रतिबिंबितं ॥
यो योजयति साहित्ये तस्य वाणी प्रसीदति ॥१४॥
भट्ट कल्लटपुत्रेण मुकुलेन निरूपिता।
सूरिप्रबोधनायेयमभिधावृत्ति मातृका ॥१५॥

इह भोगापवर्गसाधनभूतानां तद्विपर्ययपरिवर्जन प्रयोजनानां च पदार्थानां निश्चयमन्तरेण व्यवहारोपरोहिता नोपपद्यते। तथा हि सर्वाणि प्रमाणानि प्रमेयावगति निबन्धनभूतानि निश्चयपर्यवसायितया प्रमाणं य भजन्ते। प्रमाण निबन्धन भोगापवर्गसाधनभूतानां तद्विपर्यय परिवर्जनप्रयोजनानां च पदार्थानामवगतिं अतो निश्चय एव तेषां पदार्थानां व्यवहारोपरोहे निबन्धन निश्चयश्च

Fol. 3

शब्दसंभेदेनार्थं गोचरीकरोति। शब्दस्य च मुख्येन लाक्षणिकेन चाभिधाव्यापारेणार्थनिगतिहेतुत्वमिति। मुख्यलाक्षणिकयोरभिधाव्यापारयोरत्र विवेकः क्रियते कः पुनर्मुख्यो लाक्षणिको वाभिधाव्यापार इत्याशङ्क्य विषयोपदर्शनद्वारेण मुख्यलाक्षणिकौ शब्दव्यापारावुपवर्णयितुमाह

शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते ॥

शब्दव्यापाराद्यस्यावगतिस्तस्य मुख्यत्वं स हि यथा सर्वेभ्यो हस्तादिभ्यो वयवेभ्यः पूर्वं मुखमवलोक्यते तद्वदेव सर्वेभ्यः प्रतीयमानेभ्यो र्थान्तरेभ्यः पूर्वमवगम्यते ॥ तस्मान्मुखमिव मुख्य इति। शाखादि यदात्र न मुख्यशब्देनाभिधीयते ॥ तस्योदाहरणं ॥ गौरनुबन्ध्य इति ॥ अत्र हि गोशब्दव्यापाराद्यागसाधनभूता गोत्वलक्षणा जातिरवगम्यते। अतस्तस्या मुख्यता ॥ तदेवं शब्दव्यापारगम्यो मुख्योऽर्थः ॥ यस्य तु शब्दव्यापारावगम्यार्थपर्यालोचनयावगतिस्तस्य लाक्षणिकत्वं यथा पूर्वत्रैवोदा-

Fol.

Fol. 4 हरणे व्यक्तेः सा हि न शब्दव्यापारादवसीयते
विशेष्यं नाभिगच्छेत क्षीणशक्तिर्विशेषणे" इति न्यायाच्छ
ब्दस्य जातिमात्रस्य पर्यवसितत्वात् ॥ जातिस्तु व्यक्तिमन्तरेण
योगसाधनभावं न प्रतिपद्यते इति ॥ शब्दप्रत्यायितजाति-
सामर्थ्यादत्र जातेराश्रयभूता व्यक्तिराक्षिप्यते ॥ तेनासौ
लाक्षणिकी। एवमयं मुख्यलाक्षणिकात्मविषयोपवर्णनद्वारेण
शब्दस्याभिधाव्यापारो द्विविधः प्रतिपादितो निरंतरार्थ
विषयः सांतरार्थनिष्ठश्च। संप्रति तु मुख्यस्य चातुर्विध्यमभि
धीयते।

तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः ॥
तयोर्मुख्यलाक्षणिकयोरर्थयोर्मध्यान्मुख्यस्यार्थस्य चत्वारो
भेदाः ॥ जात्यादिभेदात्। चतुष्टयी हि शब्दानां प्रवृत्तिर्भगवता
महाभाष्यकारेणोपवर्णिता जातिशब्दा गुणशब्दाः क्रियाशब्दा
यदृच्छाशब्दाश्चेति ॥ तथा हि सर्वेषां शब्दानां स्वार्थाभिधानाय
Fol. 5 प्रवर्तमानानामुपाधिदर्शितविषयविवेकत्वादुपाधिनिबन्धना
प्रवृत्तिः ॥ उपाधिश्च द्विविधः वक्तृसन्निवेशितो वस्तुधर्मश्च कश्चि
वक्त्रा तस्मिंस्तस्मिन्वस्तुन्युपाधितया संनिवेश्यते कश्चित्
वस्तुधर्म एव। तत्र यो वक्त्रा यदृच्छया तत्तत्संज्ञिविषयशब्दस्या
भिव्यक्तिद्वारेण तस्मिंस्तस्मिं संज्ञिनि सन्निवेश्यते ॥ स वक्तृसं
निवेशितो यथा डित्थादीनां शब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं
स्वरूपं तत्खलु तां तामभिधाशक्तिमभिव्यंजयता वक्त्रा यदृच्छया
तस्मिंस्तस्मिन्संज्ञिनि उपाधितया सन्निवेश्यते ॥ अतस्तन्निबन्धना
यदृच्छाशब्दा डित्थादयः येषामपि च उकारादिवर्णव्यतिरिक्त
संहृतक्रमस्वरूपाभावान्न डित्थादिशब्दस्वरूपं संहृतक्रमं
संज्ञिष्वध्यवस्यत इति दर्शनम्। तेषामपि वक्तृयदृच्छाभिव्य
ज्यमानशक्तिभेदानुसारेण काल्पनिकसमुदायरूपस्य डित्थादेः
शब्दस्य तत्तत्संज्ञाऽभिधानाय प्रवर्तमानत्वाद्यदृच्छाशब्दत्वं
डित्थादीनामुपपद्यत एव। तदेवं पूर्वमुपदर्शितो यो वैयाकरण-

Fol. 5 -नयस्तदाश्रयेणोपाधिर्वक्तुं शक्यन्ते इति स्वरूपाख्यो व्याख्यातः।
यस्य तु वस्तुधर्मत्वेनोपाधेरवस्थानं तस्यापि द्वैविध्यं साध्य
सिद्धतो भेदात्। तेन साध्योपाधिनिबन्धनाः।। क्रियाशब्दा
यथा पचतीति सिद्धस्य उपाधेस्त्रैविध्यं।। जातिगुणभेदात्।
कस्यचित्त्वयं तु सिद्धस्योपाधिः पदार्थस्य प्राणप्रदाता यथा जातेः
नहि कश्चित्पदार्थो जातिसम्बन्धमन्तरेण स्वरूपं प्रतिलभते
यदुक्तं वाक्यपदीये।। गौः स्वरूपेण न गौ नाप्यगौ गोत्वाभि
~~सबंधात्~~ सम्बन्धात्तु गौरिति।। कश्चित्पुनरुपाधिर्लब्धस्वरूपस्य
वस्तुनो विशेषाधानहेतुः। यथा शुक्लादेर्गुणः न हि शुक्लादिगुणस्य
Fol. 6 पटादिवस्तुस्वरूपप्रतिलम्भनिबंधनत्वं जातिमहिम्नैव तस्य वस्तुनः
प्रतिलब्धस्वरूपत्वात्।। अतोऽसौ लब्धस्वरूपस्य वस्तुनो
विशेषाधानहेतुः।। येऽपि च नित्याः परमाणुत्वादयो गुणास्तेषामपि
सर्वेषां गुणजातीयत्वादेवं प्रकारत्वमेव।। तदेवं प्राणप्रदोपाधि
निबन्धनत्वं यस्य शब्दस्य स जातिशब्दो यथा गवादिः।। यस्मा
ल्लब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुरर्थः प्रतीयते।। स गुण
शब्दो यथा शुक्लादिः। न तु सर्वेषामपि गुणक्रियायदृच्छाशब्दा
भिमतानां जातिनिबंधनत्वं।। तथा हि गुणशब्दानां तावत्।। शुक्ला
दीनां पयः शङ्खबलाकाद्याश्रयसमवाये शुक्लादिलक्षणा गुणा
विभिन्नास्तत्समवेतसामान्यवाचिता।। एवं क्रियाशब्दानामपि
गुडतिलतांडुलादिद्रव्यान्विता ये पाकादयोऽन्योन्यमन्यत्वेना
वस्थिताः क्रियाविशेषास्तत्समवेतं सामान्यमेव वाच्यं।।
यदृच्छाशब्दानां तु डित्थादीनां शुकसारिकामनुष्यादुदी
रितेषु भिन्नेषु डित्थादिशब्देषु समवेतं डित्थशब्दत्वादिकं
सामान्यमेव यथायोगं संज्ञिष्वध्यस्तमभिधेय।। यदि वोप-
चयापचययोगितया डित्थादौ संज्ञिनि प्रतिक्षणं भिद्यमा
नेऽप्यभिधीयमानो यन्महिम्ना डित्थो डित्थ इत्येवमादिरूपत्वेना
भिन्नाकारः प्रत्ययो वाक्यशून्यः संजायते।। तत्तथाभूतं डित्था
दिशब्दावसेयवस्तुसमवेतमेव डित्थत्वादि सामान्यमभिधेयं

Fol.6 तच्च डित्थादि शब्दैरभिधीयते॥ अतश्च गुणक्रिया यदृच्छा
Fol.7 शब्दानामपि जातिशब्दत्वाच्चतुष्टयी शब्दानां प्रवृत्तिर्नेष्यते।
जात्याभिधीयते। गुणे क्रियां शब्दसंज्ञि व्यक्तीनामेव तत्तदुपाधि
निबन्धन भेदरूपा मेकाकारावगाति निबन्धनत्वं न तु जातित्वमिति
भगवता महाभाष्यकारस्याभिप्रेतम्। यथा ह्येकमेव मुखं
तैलकौस्वड्गादर्शादीनां प्रतिबिंबावगाति निबंधनानां भेदा
नानाकारत्वेन प्रत्यवभासते। तथैवैकैव शुक्लादिव्यक्ति देशकाल
वाच्छिन्ना तत्तत्कारणसामग्र्युपजनित शंखाद्याश्रय विशेषवशेन
नानारूपतयाभिव्यक्तिमासादयंती वैचित्र्येण स्युरिति॥ अत
२ श्च तस्याः शुक्लादिव्यक्तेरेकत्वाज्जातेश्च भिन्ना व्ययसमवेत
त्वाच्छुक्लत्वादि जात्यभावान्न शुक्लादिशब्दानां जातिशब्दत्वं॥
एवं पचतीत्यादौ डित्थशब्दादौ डित्थादौ च संज्ञिनि वाच्यं॥
अत्राप्येकस्या एव पाकादिक्रियाव्यक्तेर्डित्थादि शब्दव्यक्ते
डित्थादेश्च संज्ञिनो यथाक्रमंमभिव्यञ्जकानां पाकादीनां तथा
ध्वनीनां वयोवस्थाविशेषाणां च कौमारादीनां यो भेदस्तद्वशेन
नानाविधेनरूपेणावभासमानत्वात् स्थितमेतच्छब्दप्रवृत्ति
निमित्तानां चतुष्ट्वान्मुख्यः शब्दार्थश्चतुर्विध इति॥ अधुना
लाक्षणिकस्य द्विभेदत्वमुपदर्शयितुमाह॥

शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता।

लक्षणाया द्विप्रकारकत्वं शुद्धत्वादुपचारमिश्रत्वाच्च॥ शुद्धा
तावल्लक्षणा गङ्गायां घोष इति॥ अत्र हि घोषं प्रति स्रोतोविशे
षस्याधारता नोपपद्यत इति। गङ्गाशब्दः स्वाभिधेयस्य स्रोतो
विशेषस्य य समीपभूतस्तटस्य लक्षणायावगमयति॥ उपचार
Fol.8 मिश्रा तु यत्र वस्त्वन्तरे उपचर्यते॥ यथा गौर्वाहीक इति॥
अत्र हि गौशब्दो वाहीकशब्देनानुपद्यमान सामानाधिकरण्य
त्वाद्बाधितमुख्यार्थः सन् गोगता ये जाड्यमान्द्यादयो गुणास्तत्स
दृशवाहिकगत जाड्यमान्द्यादि गुण लक्षणाद्वारेण गोगतजाड्य
मान्द्यादिगुणसदृशजाड्यमान्द्यादि गुणापेते वाहिक उपचरितः

Fol. 8 तेनेयमुपचारमिश्रा लक्षणा॥ एवं शुद्धोपचारमिश्रत्वभेदेन
लक्षणायां द्वैविध्यमुक्तं॥ इदानीं तु शुद्धाया अपि लक्षणाया
द्वैविध्यं दर्शयति।"उपादानलक्षणा च शुद्धा सा द्विविधोदिता॥
यो यं लक्षणायां शुद्धा प्रतिपादिता सा द्विविधोक्ता॥ क्वचित्त्व
र्थान्तरोपादानेन लक्षणा प्रवर्तते। क्वचित्त्वर्थान्तरलक्षणेन
किं पुनरर्थान्तरस्योपदानं किंवा तस्य लक्षणमित्याशङ्क्याह॥

स्वासिध्यर्थतयाक्षेपो यत्र वस्त्वन्तरस्य तत्।
उपादानलक्षणं तु तद्विपर्ययतो मतम्॥

यत्र स्वासिद्ध्यर्थतया वस्त्वन्तरस्याक्षेपो भवति तत्रोपादानं॥
यथा गौरनुबंध्य इति अत्र हि गोत्वस्य यागं प्रति साधनत्वं
शाब्दं व्यक्त्याक्षेपमन्तरेण नोपपद्यते इति। तत्सिध्यर्थतया
व्यक्तेराक्षेपः॥ यथा च पीनो देवदत्तो दिवा न भुङ्क्ते इति॥ अत्र
हि पीनत्वं दिनाधिकरणभोजनाभाव विशिष्टतयावगम्यमा
नमेव कार्यत्वात्स्वसिध्यर्थत्वेन कारणभूतं रात्रिभोजनमाक्षेपादभ्य
पीनत्व न्तरीकरोति न हि तस्य रसायनाद्युपयोगजन्मना प्रमाणांतरेण
तदभावावसाये सत्ये तस्योदाहरणत्वात्। पीनत्वस्य चात्र दिना
धिकरणभोजनाभावविशिष्टत्वेन रसायनाद्युपयोगबाधहेतुत्वात्।
Fol. 9 अत्र च रात्रौ भुंक्ते इत्येतच्छब्दाक्षेपपूर्वकतया प्रमाणस्याप-
रिपूर्णस्य परिपूरणाच्छ्रुतार्थापत्तिरवं भवत्वथवा कारणस्यैव
रात्रिभोजनस्याक्षेपः॥ इति सर्वथा स्वासिध्यर्थत्वेनार्थांतरस्या
क्षेपपूर्वकतयान्तर्भावेनादुपादानत्वमुपपद्यते। यत्र तु पूर्वो-
दितोपादानरूपविपर्यासंश्रयात्स्वार्थासिध्यर्थतयार्थान्तर
तरस्याक्षेपः॥ अपि त्वर्थान्तरसिध्यर्थत्वेन स्वार्थसमर्पणम्।
तत्र लक्षणं यथा पूर्वमुदाहृतं गङ्गायां घोष इति॥ अत्र हि
तटस्य घोषाधारतया क्रियान्वितस्य गंगाशब्देन समर्पणं
क्रियते॥ अतोर्थान्तरभूतं तटमवगमयता गङ्गाशब्देन
स्ववाच्यभूतः स्रोतो विशेषो (अर्प्यते) गम्यते॥ इत्यर्थान्तरसिध्यर्थ-
त्वे स्वार्थसमर्पणं॥ एवं चात्र पूर्वोदितोपादानरूपविपर्यासलक्षणत्वं॥

Fol. 9 एवं शुद्धा लक्षणा द्विविधा प्रविभक्ता। इदानीमुपचारमिश्रां
चतुर्भेदत्वेन निरूपयितुमाह ॥

आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः।
प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः॥

द्विविध उपचार शुद्धो गौणश्च॥ तत्र शुद्धो। यत्र मूल
भूतस्योपमानोपमेयभावस्याभावेनोपमानगत गुणसदृश
गुणयोगलक्षणासंभवात्कार्यकारणभावादि संबंधलक्षणया
वस्त्वन्तरे वस्त्वन्तरमुपचर्यते॥ यथा आयुः घृतमिति॥ अत्र आ-
युषः कारणघृते तद्गतकार्यकारणभावलक्षणापूर्वकत्वेनायुष्ट्वं
कार्यं तच्छब्दश्चेत्युभयभावसमुपचरितं॥ तस्माच्छुद्धोयमुप
चारः गौणः पुनरुपचारो यत्र मूलभूतोपमानोपमेयभावस-
Fol.10a मास्रयेण उपमानगतयते। स हि गुणेभ्य आगतत्वाद्गौणशब्देन
भिधीयते॥ यथा गौर्वाहीकः॥ अत्र हि गोगत जाड्यमांद्यादि-
गुणसदृश जाड्यमान्द्यादि योगाद्वाहीके गोशब्द गोत्वयोरुपचारः॥
केचित्तूपचारे शब्दोपचारमेव मन्यन्ते। नार्थोपचारमेतदुक्तं
शब्दोपचारस्यार्थोपचारा।विनाभावित्वात्॥ एवमयमुपचारः॥
शुद्धगौणभेदेन द्विविधोभिहितः॥ तस्य च प्रत्येकं द्वैविध्यमध्या
रोपाध्यवसानाभ्यां। यत्राध्यारोप्य विषययोर्भेदमनपह्नुत्यैव
वस्त्वन्तरे वस्त्वन्तरमुपचर्यते॥ तत्र नपह्नुतस्वरूप एव वस्त्वन्त
रे वस्त्वन्तरस्याधिकस्यारोप्यमाणत्वादध्यारोपः॥ यथा पूर्वोक्तयो
रुदाहरणयोः॥ तत्र ह्यायुर्घृतमितीत्यत्र नायु लक्षणकार्यान्तर्ली
नतया कारणभूतस्य घृतस्य प्रतिपत्तिः॥ स्वरूपेणैव तस्य प्रति
पत्तिः॥ स्वरूपेणैव तु तस्य प्रतीयमानस्यायुष्कारणत्वादायुष्ट्वं
प्रतीयते॥ तेनात्राध्यारोपः॥ एवं गौर्वाहिक इत्यत्रापि च उपमानो
पमेयस्वरूपानपह्नवात्॥ तदेवं यत्रोपचर्यमाणेनोपचर्यमाण
विषयस्योपचर्यमाणेन्तर्लीनतया विवक्षितत्वात्स्वरूपापह्नवः
क्रियते। तत्र व्यवसानं॥ तत्र शुद्धोपचारे व्यवसानस्योदाहरणं
पंचाला इति॥ अत्र हि पंचालापत्यनिवासादिकरणत्वाज्जनपदे

On marg. जनपदस्य च लक्षणादिति संबन्धः

Fol.10 लक्षित लक्षणया पंचाला शब्दः प्रयुज्यते। पंचालेनापत्यानां
Fol. 11 लक्षणादपत्यैस्य स्वनिवासाधिकरणस्य जनपदस्य नवाशेपच
र्यमाणार्थ विषयस्योपचर्यमाणाद्भेदेन प्रतिपत्तिः। उपचर्यमाणा
र्थ निगीर्णतयैव तस्य प्रतिपत्तेः। तेनात्रोपचारत्व रूढिमाहा
त्म्याद्भ्रष्टमिव लक्ष्यते। अतोऽत्राध्यवसानगर्भः शुद्ध उपचारः
गौणोपचारे त्वं अध्यवसानस्योदाहरणं॥ राजेति। राजशब्दो
ध्वंध्रप्रयोगदर्शनाद क्षत्रिये मुख्यया वृत्त्या प्रयुक्तः सन् अन्य
त्र शूद्रादौ क्षात्रियगत जनपदपुरपालन सदृश जनपदपुरपालन।
योगलक्षणपूर्वकतया गौणावृत्त्या प्रयुज्यते पि लक्ष्यते॥ तेनात्र
गौणत्वं संगत्येव प्रतीयमानत्वादुत्कृष्टं स्याद्विचारणया समधि-
गम्यते। अतोऽत्राध्यवसान गौणगर्भो गौण उपचारः॥ तदेवमुप-
चारश्चतुर्विधः प्रविभक्तः॥ एतेन चतुर्विधेनोपचारेण सह
पूर्वोक्तौ लक्षणाभेदौ संकलय्य षट्प्रकारा लक्षणा वक्तव्या।
एषां च लक्षणा (मिश्रतया) त्रिस्कन्धा शुद्धत्वादध्यारोपाद्ध्यवसानाच्च॥
तत्र शुद्धस्कंधस्य द्विविधर्म्युपादानलक्षणाभ्यामुक्तम्॥
अध्यारोपाध्यवसाने स्कंधयोरपि प्रत्येकाद्विप्रभेदता॥ शुद्धे
गौणोपचारमिश्रत्वात्॥ तत्र तेषां त्रयाणां स्कंधानां विषय विभागं
प्रदर्शयितुमाह॥ "तटस्थ लक्षणा शुद्धा स्यादारोपस्त्वदूरगा।
निगीर्णाध्यवसानं तु रूढया सन्नतरत्वतः॥
येषा लक्ष्य शुद्धा उपादानलक्षणात्मकत्वेन द्विप्रभेदा प्रतिपा
दिता॥ सा लक्षकार्थानुपरक्तत्वात्॥ तटस्थतया प्रतीयमाने
लक्ष्येऽर्थे द्रष्टव्या॥ न हि तत्र लक्षकार्थोपरक्ततया लक्ष्यस्या-
Fol.12 र्थस्यावगतिः॥ तथा हि गंगायां घोष इत्यत्र (Fol.12) घोषाधिकरणभूत
-टोपलक्षणाभिसं-तेन गंगायां घोषो न नितरस्वभासते।
गंगाशब्दे प्रयुज्यमाने तटस्यास्त्रोतो विशेषणोपलक्षकत्वमात्रो
पयुक्तो नोपरागो न प्रतीयते॥ तटस्थेनैव तस्य तटस्य प्रत्ययात्।
एनमुपादानेऽपि वाच्यं॥ यथा (पीनत्वप्रतिपत्तिभोजनेनो) पीनो देवदत्तो दिवा न भुंक्ते इति॥
यदा तु गंगाशब्दाभिधेयस्य स्रोतोविशेषस्यातिदूरवर्तितया

Fol. तटमनपह्नुतस्वरूपं स्रोतोविशेषोपरक्ततया विवक्षितं भवति॥ तत्र पूर्वस्मिन्नुदाहरणेऽध्यारोपो भवति॥ स्रोतोविशेषोपरक्तस्य तटस्य प्रतीतेः स्रोतोविशेषादव्यतिरिक्तत्वात् स्रोतोविशेषत्वेन तटे घोष इति॥ अत्र तु त्वत्यन्तमासन्नतां घोषं प्रति स्रोतोविशेषस्य प्रतिपादयितुमेतदुक्तं स्रोतोविशेषनिर्गीर्णतया तटमपह्नुत्य प्रयुज्यते॥ गंगायामेव साक्षाद् घोषो न सम्भवतीति॥ तदाह्लादयति॥ यथा चैतदुदो पचारमिश्रतयाध्यारोपाध्यवसानयोरुदाहरणमुक्तं॥ तथा गौरेवायमिति वाक्यं॥ गौर्वाहीक इति॥ तथा गौरेवायं सादृश्यादिति अभेदेन हि यथाक्रमं गोगतगुणसदृशगुणयोगद्वारेण गोरविदूरत्वेन वाहीकस्य विवक्षितत्वात् गौत्वाध्यारोपः॥ गोगतानां तु गुणानां मुत्कटत्वे वाहीकस्य गोगौत्वाध्यवसानं यथा वास्तवतरत्वेनाध्यवसात पूर्वं प्रविभक्तं॥ तथा रूढित्वेनापि प्रविभक्तव्यम्॥ यथा पूर्वोपदर्शितयोरुदाहरणयोः पंचाला इति। तथा राजेति॥ तदिदमुक्तं सम्यगत्यन्तरगत इति॥ रूढित्वादासन्नतरत्वाच्च निगीर्याध्यवसानं स्यादित्यर्थः॥ न तु मुख्ये ऽर्थे शब्दस्य सम्बन्धावधार

Fol. 13 णात् प्रतिपादकत्वमुपपद्यते न तु लाक्षणिके तद्विपर्ययात्॥ तथा हि सम्बन्धावधारणसमये व्यवहर्तृगतयोस्तावच्छब्दप्रयोगार्थ प्रतिपत्त्योरविभक्तौ देशवाक्यवाक्यार्थनिष्ठतया पूर्वहेतुफल भावावसायो भवति। तदनन्तरं च त्रिचतुरादिदर्शनेभ्यो ऽन्वयव्यतिरेकाभ्यां वाक्यवाक्यार्थोद्देशप्रविभागगते ये प्रयोगप्रतिपत्ती तन्निष्ठ कार्यकारणभावावधारणं। तदुत्तरकालं व्यवहर्तृगतार्थप्रतिपत्त्यन्यथानुपपत्त्या शब्दार्थसंबधावगतिः॥ सा च मुख्य एवार्थे जात्यादौ चतुर्विधे न तु लाक्षणिके षट्प्रकारे न हि लाक्षणिकेनार्थेन सह शब्दस्य संबंधो मुख्येनैवार्थेन परिदृश्यते। तथा भावे हि सति तस्य मुख्यत्वमेव स्यान्न लाक्षणिकत्वम्॥ अथ शब्दस्य मुख्यो योऽसावर्थस्तेन सह संबंधो लक्ष्यमाणस्यार्थस्य दृष्ट इति तद्द्वारेण शब्दात्तस्याव गतिरित्यभिधीयते॥ एवं सति यदि निरपेक्षः स्वार्थप्रतिपादन-

Fol. 13 द्वारेण लक्ष्यमाणमर्थमवगमयति। सर्वदा तमर्थमवगमयेत्
अथ सापेक्षः। किं तस्यापेक्षणीयमित्याशङ्क्याह॥

वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात्।
लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः॥

यः परप्रतिप्रतयै वाक्यमुच्चारयति स वक्ता साकांक्षाणां
पदानामेकार्थो समूहो वाक्यं॥ शब्देन द्विविधं॥ मुख्यं लाक्षणिकं
वा॥ अभिधाव्यापारमाश्रित्य यद्गोचरीक्रियते। तद्वाच्यं॥
एतेषां त्रयाणां वक्त्रादीनां व्यस्तसमस्तभेदभिन्नानां देशकाला
वस्थास्वालक्षण्यगतसमस्तव्यस्तभेदा~~भिन्नाना~~ संयोजितानां
fol. 14 यः स्वभावभेदप्रपंचस्तत एषा Fol. 14 षट्प्रकारा लक्षणा परामर्श
कुशलैर्विवेचनीया तथाविधवक्त्रादिसामग्र्यपेक्षयैव
शब्दानां स्वार्थमवगमयतां स्वार्थद्वारेण लक्ष्यमाणार्थसं-
बंधस्य वृद्धस्य व्यवहारेणैव धारितत्वात्॥ एतदुक्तं भवति।
न शब्दानामनवधारितलाक्षणिकार्थसंबन्धानां लाक्षणिक
मर्थं प्रति गमकत्वं नापि च तत्र साक्षात्संबंधग्रहणं। किं
तर्हि वक्त्रादिसामग्र्यपेक्षया स्वार्थव्यवधानेनेति। यदुक्तमाचार्य
शबरस्वामिना। कथं पुनः परशब्दः परत्र वर्तते स्वार्थाभिधा-
नेनेति ब्रूमः इति॥ अत्र हि स्वार्थद्वारेण लक्ष्यमाणार्थाभि
निवेशित शब्दानामुक्ता पुनश्चासाविवाह लक्षणोऽपि हि
लौकिक्येवेति॥ अत्र हि संबंधावधारणसापेक्षाणां शब्दानां
लक्ष्यमाणोऽर्थे प्रवृत्तिरुक्ता॥ व्यवहारोपारूढानि हि प्रत्यक्षादीनि
प्रमाणानि लौकिकशब्देनाभिधीयते॥ लोके च विदिता लौकि
की व्यवहारावगम्या परिगृहीता॥ संबंधशब्दानिष्टेत्यर्थः॥
तदुक्तं भट्टकुमारिलेन॥

निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्॥
क्रियन्ते सांप्रतं काश्चित्काश्चिन्नैव त्वशक्तितः इति

निरूढा लक्षणा राजेत्यादिकाः॥ सांप्रतं क्रियन्ते। या वृद्ध
व्यवहारवक्त्राद्यपेक्षया तथाविधेऽन्यत्र विषये परिदृष्टस्वभावाः॥

यथा॥

स्निग्धश्यामलकांतिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानंद केकाः कलाः॥
कामं संतु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे।
वैदेही कथं भविष्यति ह हा हा देवी धीरा भवति।

Fol. 15 अत्र हि लिप्तशब्दकांतेः कुंकुमादिवल्लेपनसाधनत्वाभावाद Fol. 15
बाधितमुख्यार्थः॥ अतान्तर स्वार्थगतो योसाधीयमानत्वधीय ~~स्ये~~ तिरो
मानत्वादि धर्मः प्रतिपादितः॥ तत्सदृशो पातिरोधीयमानत्वादि
धर्मयोगात् क्रांति संपृक्तोर्थो लक्ष्यते। एव सुहृच्छब्देनापि
पयोदानामचेतनत्वेन मैत्रीसंबंधाभावान्मुख्यशब्दार्थाभावे
सति सुहृद्गता ये ते सान्मुख्यादयो धर्मास्तत्सदृशसान्मुख्यादि
धर्मयोगिनः पयोदाभिमुखा मयूरा लक्ष्यन्ते। रामशब्दस्या
पि प्रतिपन्नत्वात्संज्ञिनो मुख्यशब्दार्थबाधः। अतस्तेनापि राज्य
भ्रंश वनवास सीतापनयन पितृमरणादयः स्वाभिधेयभूतार्थैक
गामिनो साधारणदुःखहेतवो धर्मा विशिष्टसामग्र्यनुप्रविष्टेन
लक्षिताः॥ तदेवमादीनां लक्षणानां सांप्रतं क्रियमाणता॥ यासां
तु लक्षणानां वृद्धव्यवहारे न च तस्मिन् शब्दे राजशब्दवद्दर्शनं
नापि ~~च~~ च तज्जातीयेषु शब्दान्तरेषु लिप्तादिशब्दवत्तासामश-
क्यत्वात् क्रियमाणत्वमेव॥ यथा

मध्ये समुद्रं ककुभः पिशंगी यां कुर्वती कांचनभूमिभासा।
तुरंगकान्ताननहव्यवाहज्वालेव भित्त्वा दिवमुल्ललास॥

अत्र हि तुरंगकान्ताननहव्यवाहशब्दो वडवामुखाग्नौ
लक्षयणाख्या प्रयुक्तः॥ न चासौ वडवामुखाग्नौ निरूढो नापि च
तज्जातीयाः शब्दाः विशिष्टसामग्र्यनुप्रविष्टतया विवक्षितार्थगाहित्वेन
परिदृष्टा। न तु द्विरेफादीनां शब्दानां रेफद्वितयानुगतभ्रमरादिशब्द
लक्षणाद्वारेण यथा षट्पदादौ प्रवृत्तिस्तथा तुरंगकान्ताननहव्य
वाहशब्दस्यापि वडवामुखाग्नौ वडवादिशब्दलक्षणाद्वारेण कथं
Fol. 16 प्रवृत्तिर्न स्यात् तज्जातीये द्विरेफादौ शब्दलक्षणायाः परिदृष्टत्वा-

Fol 16. नैतत् यतो वृद्धव्यवहाराभ्यनुज्ञानेष्वेव शब्देषु तज्जातीय शब्द दर्शनाल्लक्षणात्वमभ्युपगम्यते॥ न तु सर्वत्र। अन्यथा सर्वेषामेव शब्दानां येन केनचिज्जातिलेशेन - - - सर्वानर्थान् प्रति लक्षणा शब्दत्वस्य वक्तुं शक्यत्वात्॥ न कश्चित् छन्दः किंचिदर्थं प्रत्यगमकः स्यात्। वृद्ध व्यवहारादनुज्ञायां तु विषयाविभागेंगीक्रियमाणे तुरंगकांतानन हव्यवाहेत्यादीनां असति प्रयोजने दुष्टत्वमेव सति तु गुप्तार्थ प्रतिपादनादि प्रयोजन सद्भाव एवं विधानामपि लक्षणानाम दुष्टत्वं॥ तथाविध विषये वृद्ध व्यवहारेण तासामनुज्ञातत्वात्। तदेवं वक्त्रादि सामग्र्यनुप्रवेशेन शब्दानां स्वार्थमर्पयिता नर्थांतर प्रतिवृद्ध व्यवहारे स्वरूप द्वारेण सजातीय शब्द द्वारेण वा गमकत्वाव-धारितानां लक्षत्वमिति स्थितं। तत्र वक्तृ निबंधनत्वेन यत्र लाक्षणिकोर्थोवगम्यते। तत्रोदाहरणं।

दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायो नैव शिशोः पिताद्य विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि तद्वनमितः स्रोतस्तमालाकुलम्।
नीरंध्राः वपुरालिखंतु जरट च्छेदा नल ग्रन्थय इति

अत्र हि परसंभोगानुभवेच्छया संकेतस्थानं युवातिर्व्रजंति स्वप्रवृत्ति प्रयोजनं विशिष्ट संकेतस्थानाचारं परपुरुषसंभोगात्मकं॥ तथा संभोगचिह्नानि। नखदशनक्षतानि॥ गात्र संलग्नत-या शंक्यमान विद्रावानि यथाक्रमं भर्तृपिपासानिवृत्तिक्षमना-

Fol. 17 देय सरस पानीयानयनेन चिरच्छिन्नलग्रंथि पुरुषजर्जर प्रागभागेन (Fol. 17) पिच्छमाणेन च गात्रगत विकारविशेषोद्भेदनापह्नुत्याभिधत्ते॥ सा चात्रापह्नुति रसाधा वक्तृत्वं पर्यालोच्यावगम्यते॥ अपह्नवस्य चालीकवस्त्वभिधानात्मत्वादलीकस्यासत्यार्थ विपर्यासकारित्वादलीकेनार्थेनात्र सत्योर्थः स्वासिद्ध्यर्थत्वेनाक्षिप्यते। तेनात्र वक्तृविशेष पर्यालोचनया सत्यार्थ निष्ठया उपादानात्मिकाया लक्षणायाः प्रतिपत्तिः। नह्यत्र प्रवाक्य वाच्यैः सामर्थ्यां साध्या वक्तृत्वे

Fol. 17 साति तयोरेवं विधार्थक्षेपासमर्थत्वात्॥ वाक्यगतरूपविशेष
पर्यालोचनया तु यत्र लाक्षणिकार्थपरिग्रहस्तत्रोदाहरणं॥

प्राप्तश्रीरेष कस्मात् पुनरपि मथितं मंथखेदं विदधत्ते।
निद्रामप्यस्य पूर्वामनलसमनसो नैवं संभावयामि।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयातः।
त्वय्यायाते वितर्कानिति दधत इव भाति कम्पः पयोधेरिति

अनेन हि चाटुश्लोकेनोपश्लोक्यते यो नृपतिस्तदीयबलभर
क्षोभ्यमाणस्वावस्थस्य समुद्रस्य यः कंपोतिशयोत्तयोपवर्णित
स्तस्य समुद्रकर्तृकं वितर्कधारणं हेतुत्वेनोत्प्रेक्षित इति विभ
विभर्कदधत इति ते च वितर्का प्राप्तश्रीरित्यादिना भगवद्वासु
देवव्यापारविशेषविषयाः यावन्न तस्य नृपतिर्भगवद्वासुदेव
ता नास्ति तावत्कथं तदीयेषु व्यापारविशेषेषु संशयः समुप
जायते अतोऽत्र यदेतद्बलभराक्रान्तत्वेन समुद्रस्याकम्पमा-
नस्यापि कम्पमानार्थसादृश्यात्कम्पमानत्वमध्यवसितं॥ तत्रा
ध्यवसानगर्भो गौणोपचारः अकंपमानस्यापि तस्य कम्पमानार्थ
Fol. 18 त्वेनाध्यवसितत्वात् अत एवायं भेदेऽप्यभेद इत्येवमात्मिका
अतिशयोक्ति वितर्कवशात्वचेतनानां मूर्धकम्पो बाहुल्येन परिदृ
श्यत इति। चेतनगतसंशयहेतुकमूर्धकम्पसादृश्यात्तद्भासा चास्य
कम्पस्योपचर्यते॥ एवं चात्राप्यध्यवसानगर्भो गौणोपचारः
इयमपि च। भिन्नयोरपि कम्पयोरभेदेनाध्यवसानाद्भेदेऽप्यभेद इत्ये
वमात्मिका अतिशयोक्तिः तन्निबंधनैवचेयमुत्प्रेक्षा इति वितर्कान्
दधत इति वेति। अत्र हि कार्यभूतस्य कम्पस्य दर्शनात्कारणभूतं
वितर्कधारणं मिथ्याज्ञानस्वरूपया उत्प्रेक्षयोत्प्रेक्ष्यते॥ अत्रापि
च वितर्कानिव धारयतोऽपि पयोधेः वितर्कधारणायनिबंधाद्
भेदेऽप्यभेद इत्येवात्मिका अतिशयोक्तिर्गर्भीकृता॥ यदुक्तमुत्प्रे
क्षालक्षणा साम्यरूपा विवक्षायां वाक्ये वाच्यात्माभिः पदैः अत
क्ति द्गुणक्रियायोगादुत्प्रेक्षातिशयान्विता॥ तेनात्राप्यध्यवसान
गर्भो गौण उपचारः॥ प्राप्तश्रीरित्यादिषु त्रिषु वितर्केषु भगवद्

Fol. 18 वासुदेव विषयेषु यथायोगं तत्तश्च कार्यनिराकारणहेतुगर्भतया प्रवर्तमानेषु नृपति भगवद्वासुदेवता क्षिप्ता॥ तेनात्रोपादाना त्मिका लक्षणा भगवद्वासुदेवरूपतया राज नृपतिरध्यवसायाद त्यवसानगर्भो गौण उपचारः॥ एतच्चात्र सर्वं वाक्योपात्तपद समन्वयान्यथानुपपत्त्या गम्यत इति वाक्यनिबंधनात्र लक्षणा वाच्यनिबन्धना तु यथा॥

दुर्वारा मदनेषवो दिशि दिशि व्याजृंभते माधवो।
हृद्युन्मादकराः शशांकरुचयो चेतोहरः कोकिलः॥
.19 उत्तुंगस्तनभारदुर्धरमिदं (Fol.19) प्रत्यग्रमन्यद्वयः।
सोढव्याः सखि सांप्रतं कथमिमे पंचाग्नयो दुःसहा॥ इति॥
अत्र हि स्मरशरप्रभृतीनां पंचानामध्यारोपित वह्निभावाना मथवाध्यवसित वह्निस्वभावानामसह्यत्वं वाक्यार्थीभूतं॥ अतस्तस्य वाच्यता॥ तत्पर्यालोचनासामर्थ्याच्च विप्रलंभ शृंगारस्याक्षेप इत्युपदानात्मिका लक्षणा वाच्यनिबंधना न ह्यत्र वक्तृस्वभावपरिशीलनस्य शब्दरहितस्योपयोगः। नापि च वाक्ये पदानां विप्रलंभशृंगाराक्षेपमन्तरेणान्वयानुपपत्तिः। वाच्यस्वरूपविचारेण त्वत्र विप्रलंभशृंगारस्याक्षेपादुपादानात्मिका लक्षणा वाच्यनिबधना विप्रलंभशृङ्गारस्य वा चात्राक्षिप्यमाणस्यापि वाच्यापेक्षया प्राधान्यं॥ सुहृदय हृदयाह्लादहेतुतया प्राधान्येनाक्षेपात्॥ हृद्युन्मादकरा इत्यत्र सत्यपि शशांकरुचीनां स्त्रीत्वे हेतुतात्(च्छी)ल्यानुलोम्यानाम विवक्षितत्वाट्टक् प्रत्ययाभावेऽचप्रत्ययान्तत्वादीकाराभावः। पूर्वं चात्र कर्मसंबन्धस्याविवक्षणादण् प्रत्ययस्याभाव इत्य प्रत्ययः॥ शिविशभारिष्टस्य कर इतिवत् अत एव वा हेत्वादि विवक्षायामपि ट प्रत्ययाभावाद् दोषः॥ एवं वक्तृ वाक्य वाच्यानामेकैकसमाश्रयेण येऽत्र त्रयो भेदा भवंति ते तावदुदाहृताः अन्येऽपि च ये वक्तारं वाक्यवाच्ययोरन्यतरेण संयुज्यते तथा वाक्यवाच्ययोरन्यतरेण संयोज्यन्ते तथा वाक्य-

Fol.19 वाच्येन सह समुच्चित्य द्विकभेदास्त्रयस्तथा त्रिकभेदाश्च वक्तृ-
वाक्यवाच्यानां त्रयाणामपि परस्परसंयोजनया एक इत्येवं
चत्वारो भेदा दृश्यन्ते॥ ते स्वबुद्ध्या षट्प्रकारलक्षणाविषयत्वेन
Fol.20 मनीषिभिरुदाहार्याः॥ एतेषां च Fol. देशकालावस्थास्वालक्षण्यगत
समस्तव्यस्तभेदप्रपंचसंयोजनेनालक्षणान्वेषणीया॥ तदेवं चतु-
र्विधमुख्योर्थो [illegible] निर्णीतः॥ लक्षणा तु षट्प्रकारोक्ता॥ इदानीं
माभिहितान्वयोन्विताभिधानं॥ तत्समुच्चयस्तदुभयाभावश्चेत्येवं
ये चत्वारः पक्षास्तेषु लक्षणाया कक्ष्यविभागं दर्शयितुमाह॥

अन्वयेभिहितानां सा वाच्यत्वादूर्ध्वमिष्यते
अन्वितानां तु वाच्यत्वे वाच्यत्वस्य पुरःस्थिता॥
द्वये द्वयमखण्डे तु वाक्यार्थे परमार्थतः।
नास्त्यसौ कल्पितेऽर्थे तु पूर्ववत्प्रविभज्यते॥

इह केषांचिदन्वयव्यतिरेकावसेयसामान्यभूतस्वार्थमात्राभिधाने-
षु पदेषु पदार्थाकांक्षासन्निधियोग्यतामहिम्ना वाक्यार्थस्यान-
भिधेयभूतस्य हर्षशोकादिवदवसेयत्वमेव॥ यथा हि ब्राह्मण
पुत्रस्ते जातः ब्राह्मण कन्या ते गर्भिणीतीति॥ यथाक्रमं पुत्र
जन्म कन्यागर्भिणीत्वनिमित्तौ हर्षशोकौ स्वशब्देनानभिहिता
वपि शब्दाभिधेयभूतवस्तुसामर्थ्यादाक्षिप्येते॥ एवं वाक्यार्थ-
स्यानभिधेयभूतस्यैव पदार्थाक्षेपत्वं द्रष्टव्यं॥ एषा वै वादिना
मतेन्वयः॥ अपरे त्वाहुः॥ वृद्धव्यवहाराच्छब्दार्थसम्बन्धत्वाव
साय स च वृद्धव्यवहारः प्रवृत्तिनिवृत्तिरूपः॥ प्रवृत्तिनिवृत्ती च
विशिष्टार्थनिष्ठे॥ अतो विशिष्ट एवार्थे पदानां सं च वा वृत्तिः
ततश्च विशिष्ट एव पदार्था न तु पदार्थानां वैशिष्ट्यम्॥ एवं
च परस्परान्वितानां वाक्यार्थरूपतापन्नानां तत्तत्सामान्याव
च्छादितत्वेन गृहीतस्ववाचकसंबंधानां पदैः प्रत्यायनादन्वि
ताभिधानमिति॥ अन्येषां तु मतं पदानां तत्तत्सामान्यभूतो
Fol.21 वाच्योऽर्थः॥ Fol.21 वाक्यस्य तु परस्परान्विताः पदार्था इति॥ पदापेक्ष
याभिहितान्वयः वा एवं चेतयोरभिहितान्वयान्विताभिधानयोः

Fol. 21 समुच्चितयोः समुच्चय इति। अखंड वाक्य वाक्यार्थ वादिनस्त्वाहुः
विशिष्टस्य वस्तुनो वाक्यार्थत्वेऽभ्युपगम्यमाने विशेषस्यानु
याथित्येन तद्विपरीत सामान्यभूतार्थावच्छादिततया विशेषाणां॥
स्ववाचकः संबंधग्रहणमुपपद्यते॥ अतः परमार्थतो वाक्यार्थयो
रखंडत्वान्नाभिहितान्वयो नाप्यन्विताभिधानं नैव तत्समुच्च
यो युज्यते पदार्थानामविद्यमानत्वात् कल्पितपदार्थनिष्ठत्वेन
भूयमपि व्यस्त समस्त रूपतया कल्पते इति॥ तत्र च यदा
तावदभिहितान्वयस्तदा स्व वाचकैरभिहितानां पदार्थानामभि
धोत्तर कालमाकांक्षा योग्यता सन्निधि महात्म्याद्विशेषण विशेष्य
भावात्मके परस्परमन्वये सति सा लक्षणा॥ पदार्थानां सामा-
न्यभूतानां यद्वाच्यत्वं तस्मादूर्ध्वं वाक्यार्थे पदार्थसामर्थ्या
दवगम्यमाने सतीष्यते॥ अन्विताभिधान पक्षे तु त्वान्वि-
तानां विशिष्टानामेव पदार्थानां वाच्यत्वमेव माभिधेयत्वं
न तु पदार्थानां सामान्यभूतत्वेनाभिहितानां विशिष्यन्ते। ते च
विशिष्टानां वस्तूनां पदार्थत्वं तावन्न घटते॥ यावत्सकलवाक्या
र्थे तु याथितया प्रतिपन्नस्याव्यभिचारितस्तद्वाचक संबंध
स्य सामान्यरूपस्य निमित्तभूतस्यार्थस्य संप्रत्यये सति तत्त-
द्वाक्यार्थस्वभाव विषयतया यथा विषयं षट्प्रकारा लक्षणा
नाविर्भवति॥ अतोऽन्विताभिधान विशिष्टानां पदानां वाक्या
Fol. 22 र्थस्वभावानां Fol.22 यद्वाच्यत्वं तस्य पुरस्तस्मात्पूर्वानिमित्ताव
स्थायां लक्षणावस्थिताभिहिताभिधान समुच्चये तु पूर्वोदित
न्यायद्वितय संकलनया पदापेक्षया वाच्यत्वेत्तर कालभाविनी
लक्षणा भवति वाक्य वाच्यात्वर्थान्तरस्याः पूर्वमवस्थानां। तदिदं
मुक्तं द्वये द्वयमिति। द्वये अभिहितान्वयान्विताभिधाया
समुच्चयोत्मके द्वयं वाच्यत्वादूर्ध्वत्वम्॥ प्राग्भावश्च लक्षणाया
इत्यर्थः॥ अखण्डे तु वाक्यार्थे असौ लक्षणा परमार्थेन
नास्ति। भिन्नानां पदार्थानां परमार्थतोऽभिधेय भावभावस्या
नुपपद्यमानत्वात्तदाश्रयत्वाच्च लक्षणायाः कल्पितपदार्थ-

Fol.22 संश्रयेण तु सा लक्षणा यथारुचि पूर्ववदभिहितान्वयान्विता
भिधानतत्समुच्चयकल्पनया विभक्त्या। भागाभिनिवेशाप
स्मारस्या देशकालावच्छेदे नाशेषव्यवह कर्तृनिष्ठतया रूढत्वात्॥
एवमभिहितान्वयादि चतुष्टये लक्षणायाः कक्ष्याविभागो
निरूपितः॥ इदानीमेतस्या लक्षणाया यत्र मुख्यार्थसंभव
स्तत्र मुख्यार्थासन्नवस्तुविषये सति योजने प्रवृत्तिमुपदर्श
यितुमाह।

"मुख्यार्थसंभवात्सेयं मुख्यार्थासन्निहेतुका रूढेः प्रयो
जनाद्वापि व्यवहारे विलोक्यते॥" या चेयं षट्प्रकारा लक्षणा
पूर्वमुक्ता सा मुख्यस्यार्थस्य प्रमाणांतरबाधितत्वेनासंभवा।
लक्ष्यमाणस्य चार्थस्य मुख्यार्थप्रत्यासन्नत्वात्सान्तरार्थग्रह
णस्य च सप्रयोजनत्वादित्येवं विधकारणवृत्त्यात्मसामग्री
समाश्रयेण न वृद्धव्यवहारे परिदृश्यते॥ यच्च तन्मुख्यार्थसि
न्नत्वं तत्पंचप्रकारलक्षणा पंचधा मतेति॥ Fol.23 केन प्रयोजनस्यापि
Fol.23 द्वैविध्यं॥ किंचिद्धि सान्तरार्थपरिग्रहे प्रयोजनमनादिवृद्धव्यवहार
प्रसिद्ध्यनुसारेणात्मकत्वाद्रूढ्य नुवृत्तिस्वभावं॥ यथा द्विरेफादौ
द्विरेफशब्देन द्वि रेफादित्य योगि भ्रमरशब्दलक्षणाद्वारेण रूढ्यनु
वृत्तिरेव क्रियते॥ अपरं तु रूढ्यनुसरणात्मकं यत्प्रयोजनमुक्तं च
व्यतिरिक्तं वस्त्वन्तरगतस्यासंविज्ञानपदस्य रूपविशेषस्य प्रतिपाद
नं नाम यथा पूर्वमुदाहृतम्॥ रामोऽस्मीति। एतच्च प्रयोजनद्वितयं
मुख्यार्थसंभवे सति मुख्यार्थप्रत्यासन्नतया पूर्वोपदर्शितेन
संबंधपंचकेनावगम्यमाने लाक्षणिकेऽर्थे यथा। विषयमनुसर्त
व्यम्। तत्र संबंधलक्षणा गंगायां घोष इति॥ अत्र हि गंगा
शब्दाभिधेयस्य स्रोतोविशेषस्य घोषाधिकरणत्वानुपपत्त्या
मुख्यशब्दार्थबाधे सति योऽसौ समीपसमीपिभावात्मकः संबंधः
तदाश्रयेण तटं लक्षयति॥ अत्र च लक्षणाया प्रयोजनं तटस्य गंगा
त्वैकार्थसमवेता॥ संविज्ञानपदपुण्यत्वमनोहरत्वादि प्रतिपादनम्॥
न हि तत्पुण्यत्वमनोहरत्वादि स्वशब्दैः स्प्रष्टुं शक्यते॥ ——

Fol. 23 अव्याप्त्यव्याप्तिप्रसंगात्॥ सादृश्यलक्षणाया मुदाहरणं॥

भ्रमर भ्रमता दिगंतराणि

क्वचिदास्वादितमीक्षितं श्रुतं वा।

वद सत्यमपास्य पक्षपातं

यदि जातीकुसुमानुकारी पुष्पम्॥

अत्र हि भ्रमरपुष्पशब्दौ संबोधनाद्यनुपपत्त्या बाधितमुख्यार्थौ वाभिधेयसादृश्यात्तद्गतगुणस्यसदृशगुणयुक्तमर्थान्तरं लक्षण

Fol. 24 याबगमयतः Fol. 24 प्रयोजनं चात्र भ्रमरत्वपुष्पत्वैकार्थसमवेतक्रिया गुणसदृशानामसंपिज्ञानपदानां क्रियागुणानां प्रतिपादनं समवायतो लक्षणा छत्रिणो यान्तीति॥ अत्र बहुवचनप्रयोगान्मुख्यशब्दार्थ पदार्थबाधः॥ न ह्येकस्मिन् छत्रिणि बहुवचनस्य प्रयोगानुपपद्यते॥ अतोत्र गमनलक्षणायां क्रियायां छत्रिणा सह योऽसौ छत्रशून्यानां समवायःसाहचर्यं तद्वशाच्छत्रीशब्देन छत्रशून्या अपि लक्षणयावगम्यते। प्रयोजनं चात्र छत्रशून्यानां सर्वात्मना छत्रोपेतस्यास्यनुतयायिता प्रतिपादनं॥ वैपरीत्याल्लक्षणा भद्रमुखेति॥ अत्र हि भद्रमुखशब्दस्याभद्रमुखे प्रयोगान्मुख्यार्थलाभः॥ अतोसौ स्ववाच्यभूतभद्रमुखत्वविपरीतत्वादभद्रमुखत्वं विपरीतनिबंधनतया लक्षणया प्रत्याययति अत्र च लक्षणाप्रयोजनं गुप्ताऽसत्यार्थप्रतिपत्तिः॥ गुप्तो ह्यसत्यार्थस्तत्तदभिप्रायवशेन प्रायेण प्रयोक्तृभिः प्रतिपद्यते॥ क्रियायोगाल्लक्षणाया मुदाहरणं॥ महति समरे शत्रुघ्नस्त्वमिति॥ अत्र शत्रुघ्नशब्दप्रयोगान्मुख्यशब्दार्थबाधः॥ शत्रुघ्नशब्दश्चाशत्रुघ्नो शत्रुहननक्रियाकर्तृत्वयोगात् लक्षणया प्रयुक्तः॥ प्रयोजनं चात्र शत्रुघ्नशब्दाभिधेयनृपातिरूपता प्रतिपादनं॥ तथा च॥ पृथुरसि गुणा मूर्त्या रामो नलो भरतो भवान्।

महति समरे शत्रुघ्नस्त्वं तथा जनकः स्थितेः॥

इत्युपक्रम्य इति सुचरितैः ख्यातिं बिभ्रच्चिरंतन भूभृतां कथमिति न मांधाता देव त्रिलोकविजय्यपि इति। शत्रुरूपतया

Fol. 25 नृपतित्वमुपश्लोक्यमानस्य राज्ञो वर्णितं॥ तदेवं निबन्धनत्रय समुद्भवता लक्षणा नृत्तस्योक्ता॥ इदानीं पंचविधं संबंधनिबंधनायामासत्तो पूर्वोपवर्णितायां क्वचिद्वाच्यस्याति तिरस्कारः॥ क्वचिद्विवक्षितत्वं क्वचिच्चाविवक्षितत्वमित्येवं विधं त्रयं सहृदयैरुपदर्शितं॥ तस्य विषयविभागमुपदर्शयितुमाह

सादृश्ये वैपरीत्ये च वाच्यस्याति तिरस्क्रिया।
विवक्षा वाविवक्षा च संबंधसमवाययोः॥
उपादाने विवक्षात्र लक्षणे त्वविवक्षणं॥
तिरस्क्रियाः क्रियायोगात्क्वचित्ताद्वरीता॥

आभिधेयेन संबन्धादित्यत्र यदा सत्पञ्चकमुक्तं तत्र सादृश्ये वैपरीत्ये च वाच्यस्यात्यंतं तिरस्कारः॥ तथा हि सादृश्ये निबंधनायां लक्षणायामुपमानवाचिनः पदस्योपमेयपरत्वादुपमानात्मकं वाच्यमत्यन्तं तिरस्क्रियते॥ यथोपदर्शितं स्निग्धश्यामलकान्ति लिप्तवियतीति॥ पयोदसुहृदामिति॥ अत्र हि लिप्तसुहृच्छब्दयोः स्वार्थोपमितवस्तुपरत्वात्स्वार्थस्यात्यंत कार्यानन्वितत्वं॥ वैपरीत्य सम्बन्धनायां तस्यामर्थांतररूपा वाच्य विपरीत स्योपादायत्वा वाच्यस्यात्यन्त तिरस्कारः॥ यथा भद्रमुखेति॥ अत्र हि भद्रमुखत्वमभद्रमुखपरत्वादत्यन्तं तिरस्कृतं॥ एवं सादृश्यवैपरीत्य योरत्यन्तं तिरस्कृत वाच्यता। सम्बंध समवाययोस्तु वाच्यस्य विवक्षितत्वाविवक्षितत्वेन नत्वत्यंतं तिरस्कारः॥ तत्र ह्युपादानात्मिकायां लक्षणायामुपादाने वाच्यविवक्षायां वाच्यस्य विव
Fol. 26 क्षितत्वम्॥ तथा हि तत्र वि[Fol. 26]वक्षितान्यपरवाच्यता सहृदयैः काव्य वर्त्मनि निरूपिता॥ लक्षणे तु वाच्यस्याविवक्षार्थांतरसंक्रांतत्वात् तत्र संबंधनिबन्धनायां लक्षणायामुपादाने वाच्यविवक्षायामुदाहरणम्॥ पीनो देवदत्तो दिवा न भुंक्त इति अत्र हि दिनाधिकरण भोजनाभावविशिष्टतया पीनत्व लक्षणं कार्यं विवक्षितमेव सच्च विध्यर्थत्वेन संबंधनिबन्धनया लक्षणया रात्रिभोजनात्मकं कारणमाक्षिपति॥ समवायनिबन्धनायां तस्यामुपादाने वाच्यस्य विवक्षि-

Fol. 26 तत्वं॥ यथा छत्रेण यांतीति॥ अत्र हि यदा छत्री बहुत्वोपेतत्वात्स
गत बहुत्वान्वयसंसिद्धार्थत्वेन छत्रशून्यान् आक्षिपति॥
तदा समवाय निबंधने छत्रशून्यानामुपादाने क्रियमाणे
वाच्य छत्री विवक्षितः॥ तदेवं संबंध समवाय निबंधनायो
रुपादानात्मिकयोर्लक्षणयोः वाच्यस्य विवक्षितत्वमुक्तं॥
लक्षणात्मिकयोस्तु तयोर्वाच्यस्य विवक्षा न त्वत्यंतं तिरस्का
रः॥ लक्ष्यमाणद्वारेण कथंचित् कार्यान्वितत्वात्॥ तत्र संबंध
निबंधनायां लक्षणायामविवक्षितत्वेनुदाहरणम्॥ रामोस्मीति
अत्र हि रामशब्दस्य वाच्यस्य दाशरथिरूपं व्यंग्यधर्मांतर
परिणतत्वात् स्वपरत्वेनानुपात्तं तस्मादविवक्षितं॥ तत्वात्यंतं
तिरस्कृतं॥ व्यंग्यधर्मद्वारेण वाच्यार्थो कथंचिदन्वितत्वात्॥
एवं गंगायां घोष इत्यादावप्युन्नेयम्॥ समवाय निबंधनायां
तु लक्षणायामविवक्षितत्वाद्वाच्यता छत्रिणो यांतीत्यत्रो
दाहार्या॥ तथा हि यदा छत्रित्वं बहुत्वान्वयान्यथानुपपत्त्या
समुदायपरतयोपादीयते तदा समुदायस्य विवक्षितत्वाद्वाच्य
Fol. 27 स्याविवक्षा॥ एवमपि Fol. 27 समुदायांतरर्भूतत्वात्समुदायद्वारेण
छत्रिणोऽपि क्रियान्वयः सुलभ एव॥ अत एव चात्र वाच्य
स्य नात्यंत तिरस्कारः॥ समुदायस्यांतर्भूतत्वेन क्रिया-
न्वितत्वात्तदेवं सत्वस्य समवाय निबंधनयोर्लक्षणयोर्वाच्यस्य
विवक्षितत्वमविवक्षितत्वं च न त्वत्यंत तिरस्कार इति स्थितं॥
क्रियायोगे निबंधनायां तु लक्षणायां शब्दगतानेकशक्त्य
नुसरणार्थं च शक्तिमूलता लक्ष्यमाणस्यार्थस्य तत्र च वाच्य
स्यार्थस्य तिरस्क्रिया॥ यथा पुरुषः पुरुष इति॥ अत्र ह्येकेन
पुरुषशब्देन विशिष्टजातीयस्यार्थस्योपात्तत्वादपरः पुरुषशब्दः
सवाच्य तिरस्कारेणैव क्रियते॥ योग निबंधनया लक्षणया
पुनरपि तत्वमुपादत्ते॥ यत्र तु निमित्तसद्भावाद्वाच्येर्थे विवक्षित
एव॥ तस्यार्थांतरे शब्दशक्त्यंतरमूलतया नारोपितस्याप्यारोपः
क्रियते॥ तत्र तद्विपरीतता वाच्यार्थे तिरस्क्रिया वैपरीत्यात्र सत

Fol. 27 तत्र वाच्यस्यार्थस्य तिरस्क्रिया॥ अपि तु विवक्षितत्वमेव॥
यथा सहति संग्रामे समरे शत्रुप्रत्यर्थिनीति॥ अत्राहितशत्रुघ्न
शब्दः शत्रुहननक्रियाकर्तृत्वं क्रियायोगनिबंधनतया लक्षणया
नामधेयत्वापि स्वार्थं शक्यार्थं दाशरथिरूपमानतया प्रतिपादयति
तेन तस्य विवक्षितस्वार्थतापि । यद्यपि रूपमेव परत्वेनोपमान
स्योपादानादेतं विधे विषये अत्यन्ततिरस्कृतवाच्यता सहृदयैरंगी
क्रियते॥ तथापि क्रियायोगनिबंधनलक्षणैकत्वे तावच्छब्दस्य
तस्योपमानत्वेनांगीकृतत्वादतिरस्कृतवाच्यतापि भवति॥ तदेव
क्रियायोगनिबंधनायां लक्षणायां क्वचिद्वाच्यं तिरस्क्रियते
Fol. 28 क्वचिद्विवक्षितं इति स्थितं॥ एतच्च सर्वं वस्तुतत्त्वमर्यादि
नाति निरूप्यते॥ लक्षणामार्गावगाहित्वं तु ध्वनेः सहृदयै
र्मुक्तकत्वोपवर्णितस्य विद्यते इति देशमुखमीमांसितुमिदमत्रोक्तम्॥
एतच्च विद्वद्भिः कुशाग्रीयया बुद्ध्या निरूपणीयं॥ न तु यागी
येनासत्ताभितत्वं अत्यन्तमतिप्रसंगेन॥ तदेवं वाच्यस्य तिरस्का
तिविवक्षा विवक्षणां विषयविभागो निरूपितः॥ इदानीं सकलशब्द
विभागात्मकस्य शब्दतत्त्वस्य यदा शब्दार्थसंबंधनिरपेक्षतया
तथा रज्जुसर्पवद्विवर्तमानत्वं तदैवैतदभिधावृत्तं दशविधं
व्यवहारोपयोगितां प्रतिपद्यते॥ न तु संहृतक्रमत्वावस्थायां
इति दर्शयितुमाह॥

विवर्तमानं वाक्तत्वं दशविधं विलोक्यते।
संहृतक्रमभावे तस्मिंस्तेषां कुतो गतिः॥

सकलशब्दविभागात्मनः शब्दतत्त्वस्य प्रसाद्य प्रसारप्रसंगप्रवृत्त
त्वेन प्रकारचतुष्टयेन प्रत्येकं वाच्यवाचकतत्संबंधप्रपंच
भाज्ये रज्जुसर्पवद्विवर्तस्यावान्तरविभेदप्रपंचत्वेनैव विविध दश
विधावृत्तसमन्वितत्वं॥ प्रशमस्तमितसकलविकल्पांशोपसंहृत
त्वात्॥ अतः भेदसंहारेण तस्मिन् वाक्तत्वे विवर्तमाने तेषां
अभिधावृत्तानां दशानां कुतो गतिः तेन प्रसारः इत्यर्थः॥ इदानीं
प्रकरणार्थमुपसंहरति॥ इत्थं तदभिधावृत्तं दशधात्र विवेचितम्॥

Fol. 28 मुख्यस्याभिधावृत्तस्य प्रकारैश्चत्वारो लाक्षणिकस्य तु षड्विधत्वेनं दशप्रकारमभिधावृत्तं विवेचितम्॥ अधुना फल मेतस्योपदिश्यते॥

Fol. 29 पदवाक्यप्रमाणेषु तदेतत्प्रतिबिंबितम्।

यो योजयति साहित्ये तस्य वाणी प्रसीदति॥

[illegible] व्याकरणं॥ वाक्यस्य [illegible] हेतुत्वाद्वाक्यं॥ मीमांसा [illegible] प्रमाणं तर्कः॥

एतेषु पदवाक्यप्रमाणशास्त्रेषु [illegible] किंतु [illegible] प्रति [illegible] मभिधावृत्तं [illegible] प्रयत्नेन [illegible] स वाचक [illegible] प्रसीदंत्या [illegible] ॥ [illegible] मभिधावृत्तेन [illegible] व्याकरणमीमांसा तर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषूपयोगात्॥ तद्द्वारेण च [illegible] प्रसाद [illegible] विधस्याभिधावृत्तस्य सकल [illegible] ॥

भट्टकल्लटपुत्रेण मुकुलेन निरूपिता॥

सूरिप्रबोधनायेयमभिधावृत्तमातृका॥

ग्रंथाग्रं॥ ४१७।

भट्टकल्लटात्मज मुकुल विरचिता अभिधावृत्तिमातृका समाप्तेति॥ शुभमस्तु॥ सं. १७३० माघ सुदि १७॥

लि: नवल